# श्री गणेश स्तोत्रं

## नारायण उवाच

अथ विष्णु: सभामध्ये सम्पूज्य तं गणेश्वरम् |
तृष्टाव परया भक्त्या सर्वविघ्निवनाशकम् || १ ||

## श्री विष्णुरुवाच

ईश त्वां स्तोतुमिच्छामि ब्रह्मज्योति: सनातनम् |
निरूपितुमशक्तोऽहमनुरूपमनीहकम् || २ ||

प्रवरं सर्वदेवानां सिद्धानां योगिनां गुरुम् |
सर्वस्वरूपं सर्वेशं ज्ञानराशिस्वरूपिणम् || ३ ||

अव्यक्तमक्षरं नित्यं सत्यमात्मस्वरूपिणम् |
वायुतुल्यातिनिर्लिप्तं चाक्षतं सर्वसाक्षिणम् || ४ ||

संसारार्णवपारे च मायापोते सुदुर्लभे |
कर्णधारस्वरूपं च भक्तानुग्रहकारकम् || ५ ||

वरं वरेण्यं वरदं वरदानामपीश्वरम् ।
सिद्धं सिद्धिस्वरूपं च सिद्धिदं सिद्धिसाधनम् || ६ ||

ध्यानातिरिक्तं ध्येयं च ध्यानासाध्यं च धार्मिकम् ।
धर्मस्वरूपं धर्मज्ञं धर्माधर्मफलप्रदम् || ७ ||

बीजं संसारवृक्षाणामङ्कुरं च तदाश्रयम् |
स्त्रीपुन्नपुंसकानां च रूपमेतदतीन्द्रियम् || ८ ||

www.viswakalyanam.org






With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

सर्वाद्यमग्रपूज्यं च सर्वपूज्यं गुणार्णवम् |
स्वेच्छया सगुणं ब्रह्म निर्गुणं चापि स्वेच्छया || ९ ||

स्वयं प्रकृतिरूपं च प्राकृतं प्रकृते: परम् |
त्वां स्तोतुमक्षमोऽनन्त: सहस्त्रवदनेन च || १० ||

न क्षम: पञ्चवक्त्रश्च न क्षमश्चतुरानन: |
सरस्वती न शक्ता च न शक्तोऽहं तव स्तुतौ || ११ ||
न शक्ताश्च चतुर्वेदा: के वा ते वेदवादिन: || १२ ||

इत्येवं स्तवनं कृत्वा सुरेशं सुरसंसदि |
सुरेशश्च सुरै: सार्द्ध विरराम रमापति: || १३ ||

इदं विष्णुकृतं स्तोत्रं गणेशस्य च य: पठेत् |
सायंप्रातश्च मध्याह्ने भक्तियुक्त: समाहित: || १४ ||

तद्विघ्निघ्नन् कुरुते विघ्नेश: सततं मुने |
वर्धते सर्वकल्याणं कल्याणजनक: सदा || १५ ||

यात्राकाले पठित्वा तु यो याति भक्तिपूर्वकम् |
तस्य सर्वाभीष्टसिद्धिर्भवत्येव न संशय: || १६ ||

तेन दृष्टं च दु:स्वप्नं सुस्वप्नमुपजायते |
कदापि न भवेत्तस्य ग्रहपीडा च दारुणा || १७ ||

भवेद् विनाश: शत्रूणां बन्धूनां च विवर्धनम् |
शश्वद्विघ्नविनाशश्च शश्वत् सम्पद्विवर्धनम् || १८ ||



With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133

स्थिरा भवेद् गृहे लक्ष्मी: पुत्रपौत्रविवर्धिनी |
सर्वैश्वर्यमिह प्राप्य ह्यन्ते विष्णुपदं लभेत् || १९ ||

फलं चापि च तीर्थानां यज्ञानां यद् भवेद् ध्रुवम् |
महतां सर्वदानानां श्रीगणेशप्रसादत: || २० ||

**इति श्री विष्णु कृत गणेश स्तोत्रं सम्पूर्ण**

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133